CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 421

Title Purusottama Sahasranama

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 421 Subject: Stotra

Title: Purusottama sa sahastra nāma

Author: — Scribe: —

Date of the work: — Date of the Ms.: V.S. 1952

Place of the work: — Place of the Ms.: —

Size: 6·7" by 4·1" Extent: 42 fol.

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥श्रीगणेशायनमः॥ श्रीकृष्णायनमः॥ श्री
पुरुषोत्तमायनमः॥ ॥पुराणपुरुषोविष्णुःपु
रुषोत्तमउच्यते॥ नाम्नांसहस्रंवक्ष्यामिनस्यभग
वतोधृतं॥१॥ यस्यप्रसादाद्गीशाः प्रजेशाविभवो
न्नना॥ क्षुद्राअपिभवंत्यासुश्रीकृष्णंतन्नतोस्म्यहं
॥२॥ अनंतादेवकृष्णस्यलीलानामप्रवर्तकाः॥

॥१॥

उक्ता भागवते गूढाः प्रकटा अपि कुत्रचित् ॥ ३॥
अनस्तानि प्रवक्ष्यामि नामानि मुरवैरिणः ॥ सह
स्रं यैस्तु पठितैः पठितं स्याच्छुकामृतं ॥ ४॥ कृष्ण
नामसहस्रस्य ऋषिरग्निर्निरूपितः ॥ गायत्री च
तथा छंदो देवता पुरुषोत्तमः ॥ ५॥ विनियोगस्य
स्तेषु पुरुषार्थेषु वै मतः ॥ बीजं भक्तिः प्रियः श

॥१

क्तिः सत्यवागुच्यते हरिः ॥ ६॥ भक्तोद्धरणयत्न
स्तु मंत्रोक्तपरमो मतः ॥ अवतारीत भक्तांशः की
लकं परिकीर्त्तितं ॥ ७॥ अर्थसर्वसमर्थश्च गोविंद
कवचं मतः ॥ पुरुषो ध्यानमंत्रोक्तं सिद्धिः शरण
संस्मृतिः ॥ ८॥ श्रीकृष्णसच्चिदानंदो नित्यलीला
विनोदकृत् ॥ सर्वागमविनोदी च लक्ष्मीशः पुरु

षोनमः॥ आदिकालः सर्वकालः कालात्मा मा
यावृतः॥ भक्तोद्धारप्रयत्नात्मा जगत्कर्त्ता जग
न्मयः॥ १०॥ नामलीलापरोविष्णुर्ज्ञानात्मा शुक
मोक्षदः॥ व्यापिवैकुंठदाताचश्रीमद्भागवता ग
मः॥ ११॥ शुकवागमृतांध्वीदुग्धाशौनकाद्यखि
लेष्टदः॥ भक्तिप्रवर्त्तकस्त्रीणांव्यासचिंताविना

शकः॥ १२॥ सर्वसिद्धांतवागात्मानारदाद्यखिले
ष्टदः॥ अंतरात्मा ध्यानगम्योभक्तिरत्नप्रदायकः॥
१३॥ मुक्तोप्यस्पृष्टपूर्णात्मामुक्तानांशतिवर्द्धनः॥
भक्तकार्यैकनिरतोद्रोणास्त्रविनिवारकः॥ १४॥
भक्तसमयप्रणेताच भक्तवाक्यरिपालकः॥ ब्रह्म
ण्यदेवो धर्मात्मा भक्तानांचपरिरक्षकः॥ १५॥ आ

संन्नहितकर्त्ताचमायाहितकरः प्रभुः ॥ उत्तराप्रा
णदाताचब्रह्मास्त्रविनिवारकः ॥ १६ ॥ सर्वतः पांड
वपतिः परिक्षच्छुद्धिकारणं ॥ गूढात्मासर्वदेवेषुभ
क्तैकहृदयंगमः ॥ १७ ॥ कुंतिस्तुत्यः प्रसन्नात्माप
रमाद्भुतकार्यकृत् ॥ भिष्ममुक्तिप्रदः स्वामिभक्तमो ॥३॥
हनिवारकः ॥ १८ ॥ सर्वापस्थासुसंसेव्यः क्षमसौ

ख्यहितप्रदः ॥ कृतकृत्यः सर्वसाक्षीभक्तस्त्रीरति
वर्द्धनः ॥ १९ ॥ सर्वसौभाग्यनिलयः परमाश्चर्यरू
पधृक् ॥ अनन्यपुरुषः स्वामी द्वारकाभाग्यभाजनं
॥ २० ॥ बीजसंस्कारकर्त्ताचपरिक्षद्ज्ञानपोषकः ॥ स
र्वत्रपूर्णगुणकः सर्वभूषणभूषितः ॥ २१ ॥ सर्वल
क्षणदाताचधृतराष्ट्रविमुक्तिदः ॥ सन्मार्गरक्षकोनि

स्यं विदुरप्रीतिपूर्वकः ॥ २२॥ लीलाव्यासाहक
र्त्ताच कालधर्मप्रवर्त्तकः ॥ पांडवानां मोक्षदाता
परिक्षद्भाग्यवर्द्धनः ॥ २३॥ कलिनिग्रहकर्त्ताच
धर्मादीनांचपोषकः ॥ मत्सगज्ञानहेतुश्च श्रीभा
गवनकारणं ॥ २४॥ ॥ इतिश्रीभागवनप्रथम
स्कंधनामानि ॥ ॥ प्राकृतादष्टमार्गश्च श्रोतव्य

सकलागमैः ॥ कीर्त्तितव्यः शुद्धभावैः स्मर्त्त
व्यताश्च वित्तमैः ॥ २५॥ अनेकमार्गकर्त्ताच
नानाविधगतिप्रदः ॥ पुरुषः सकलाधारः स
त्वैकनिलयात्मभूः ॥ २६॥ सर्वधेयोयोगगम्यो
भक्त्याग्राह्यः सुरः प्रियः ॥ जन्मादिसार्थिककृति
लीलाकर्त्तापतिः सतां ॥ २७॥ आदिकर्त्तानत्वक

र्त्तासर्वकर्त्ताविशारदः॥ नानावर्णाकर्त्ताचत्रै
लाविभावकारणं॥२८॥ दशलीलाविनोदीच
नानावृष्टिप्रवर्त्तकः॥ अनेकक्लेशकर्माच म
र्दोषविवर्जितः॥२९॥ गुणानीतोनवद्यात्मा
सर्वलीलाप्रवर्त्तकः॥ साक्षात्सर्वजगत्कर्त्तामिक
दादिप्रवर्त्तकः॥३०॥ वैराग्यहेतुतीर्थात्मासर्वी

तीर्थनिवारकः॥ तीर्थस्तुद्वैकनिलयःस्वर्गगा
परिपोषकः॥३१॥ तीर्थकीर्त्तिभक्तगम्योभक्तानु
शयकार्यकृत्॥ भक्ततुल्यसर्वतुल्यस्वेच्छासर्वप्र
वर्त्तकः॥३२॥ इतिश्रीभागवतद्वितीयस्कंधना
मनि॥२॥ ॥मायाप्रवर्त्तकः साक्षीमायार
तिविवर्द्धनः॥ आकाशात्माचतुर्मूर्त्तिःचतुर्द्धाभू

नभावनः ॥ ३२ ॥ रजःप्रवर्त्तकोब्रह्मामरिच्या
दिपितामहः ॥ वेदकर्त्तायज्ञकर्त्तासर्वकर्त्तामितात्म
कः ॥ ३३ ॥ अनेकसृष्टिकर्त्ताचदशधासृष्टिकार
कः ॥ यज्ञांगोयज्ञधाराद्रोभूधरोभूनिपालकः ॥
३४ ॥ सेनुर्विधरणोजेत्रोहिरण्याक्षांनकःसुरः ॥
दिनिकश्यपकाम्येकहेतुस्सृष्टिप्रवर्त्तकः ॥ ३५ ॥

देवाभयप्रदानाच्चवैकुंठादिपनिर्मदान् ॥ सर्वग
र्वप्रहारीचसनकाद्युत्सितर्थदः ॥ ३६ ॥ सर्वस्वि
सनकर्त्ताचभक्तुल्यावरप्रदः ॥ कालक्षणदे
तुश्चसर्वार्थज्ञापकःपरः ॥ ३७ ॥ भक्तोन्नतिकरः
सर्वप्रकारसुखदायकः ॥ नानायुद्धप्रकरणेब्रह्म
शापविमोचकः ॥ ३८ ॥ पुष्टिसर्वप्रणेताचगुणस्त

ष्टिप्रवर्तकः॥ कर्ममेष्टप्रदाताचदेवदूत्याखिला
र्थदः ॥३९॥ शुक्लनारायणःसत्यकालधर्मप्र
वर्तकः॥ ज्ञानावतारशांतात्माकपिलःकालना
शनः॥४०॥ त्रिगुणाधिपतिःसांख्यःशास्त्रक
र्त्ताविशारदः॥ सर्वादूषणहारीचपुष्टिमोक्षप्र
वर्त्तकः॥ ४१॥ लौकिकानंददानाचब्रह्मानंद

प्रवर्तकः॥ भक्तिसिद्धांतवक्ताचसगुणज्ञानदी
पकः॥४२॥ आत्मप्रदःपूर्णकामोयोगात्मायो
गभावितः॥ जीवन्मुक्तिप्रदःश्रीमान्नन्यभक्तिप्र
वर्त्तकः॥४३॥ कालसामर्थ्यदाताचकालदोषनि
वारकः॥ गर्भोक्तज्ञानदाताकर्ममार्गनियाम
कः॥ ४४॥ सर्वमार्गनिराकर्त्ताभक्तिमार्गैकपो

षकः ॥ सिद्धहेतुः सर्वहेतुः सर्वाद्यैर्यैककारणं
४५॥ चेतनाचेतनपतिः समुद्रपरिपूजितः ॥
सात्मा चार्यस्तुतः सिद्धः पूजितः सर्वपूजितः ॥४६॥
॥ इति श्रीभागवततृतियस्कंधः नामानि ॥
विसर्गकर्मासर्वेशः कोटिसूर्यसमप्रभः ॥ अनंत
गुणगंभीरोमहापुरुषपूजितः ॥ ४७ ॥ अनंतसु

खदानाचब्रह्मकोटिप्रजापतिः ॥ सुधाकोटि
स्वास्थ्यदनुः कामधुक्कोटिकामदः ॥ ४८ ॥ सप्त
द्रकोटिगंभीरोनीर्यकोटिसमाक्षयः ॥ सुमेरु
कोटिनिधिपः कोटिब्रह्मांडविग्रहः ॥ ४९ ॥
कोट्यश्वमेधपापघ्नायुकोटिमहाबलः ॥ को
टीदुजगदानंदी शिवकोटिप्रसादकृत ॥ ५० ॥

॥९॥ सर्वमङ्गलमाङ्गल्यः सर्वसद्गुणभाजनः॥ म
न्वादि प्रेरको धर्मो यज्ञनारायणः परः॥५१॥
अकूनिसूनुर्देवेंद्रो रुचिजन्माभयप्रदः॥ऋषि
णामनिरोजस्वीक्रियाशक्तिः परायणः॥ ५२॥
इत्याभयो योगपतिर्योगमार्गप्रवर्तकः॥अन ॥९॥
सूयागर्भरत्नऋषिवंशाविवर्द्धनः॥५३॥गु

णत्रयविभाग्यश्चचतुर्वर्गविशारदः॥नारा
यणो धर्मसूनुर्मूर्तिपुण्ययशस्करः॥५४॥
सङ्कल्पकवचछदीनपःसारो नरप्रियः॥वि
श्वानंदप्रदःकर्मसाक्षीभारनघूजिनः॥५५॥
अजनाद्रुनमहात्म्यो बदरीस्थानभूषणं॥जिन
कामजिनक्रोधो जिनसंगो जितेंद्रियः॥५६॥ऊ

॥१०॥ वंशीप्रभवःस्वर्गसुखदायीस्थिनिःस्पृहः॥ अ
मानीमानदोगोप्राभगवच्छास्त्रबोधकः॥५७॥
ब्रह्मादिवंद्योदंसश्रीर्मायावैभवकारणं॥विवि
धानंनसर्गात्माविश्वपूरणनस्वरः॥५८॥यज्ञ
जीवनहेतुश्चयज्ञस्वामीष्टबोधकः॥नानासि ॥१०॥
द्धांतगम्यश्चसत्तनंतुश्चषड्गुणः॥५९॥अनिस

र्गजगत्कर्तानानालीलाविशारदः॥ ध्रुवप्रियो
ध्रुवस्वामीचिंतिनाधिकदायकः॥६०॥दुर्लभा
नंतफलदोदयानिधिरमित्रहा॥अंगस्वामीक्ष
पासारोवैन्योभूमिनियामकः॥६१॥भूमिदो
ग्धाप्रजाप्राणपालनैकपरायणः॥यशोदानाश्चा
नदानासर्वधर्मप्रदर्शकः॥६२॥पुरंजनोजग

म्मित्रो विसर्गांतप्रदर्शकः ॥ प्रचेतसांपतिश्चित्र
भक्तिहेतुजनार्द्दनः ॥ ६३॥ स्मृतिहेतुब्रह्मभाव
सायुज्यादिप्रदः शुभः ॥ इतिश्रीभागवतचतु
र्थस्कंधनामानि ॥ ४॥ ॥विजयीस्थितिली
लाध्विरच्युतो विजयप्रदः ॥ ६४॥ स्वसामर्थ्य
प्रदोभक्तकीर्त्तिहेतुरधोक्षजः ॥ प्रियव्रतप्रि

पः स्वामी स्वेच्छावादविशारदः ॥ ६५॥ संग
गम्यः स्वप्रकाशः सर्वसंगविवर्जितः ॥ इच्छायां
चसमर्यादात्यागमात्रेपलंभनः ॥६६॥ अचिं
त्यकार्य्यकर्त्ताचतर्कागोचरकार्यकृत् ॥ शृंगार
रसमर्यादाआग्नीध्ररसभाजनः ॥६७॥नाभी
ष्टपूरकः कर्ममर्यादादर्शनोत्सुकः ॥ सर्वरूपो

ह्युनंतमोमर्यादापुरुषोनमः॥ ६८॥ सर्वरूपे
णसत्यात्माकालसाक्षीशशिप्रभः॥ मेरुदे वी
घ्नफलभृषाभोभगलक्षणः॥ ६९॥ जगत्तंत
र्कोमेघरूपिदेवेंद्रदर्पहा॥ जयंनिधनिरत्यं
तप्रमाणाशेषलौकिकः॥ ७०॥ ज्ञानधाव्य

स्तभूतात्माशतानंदोगुणप्रभुः॥ वैष्णवोत्पा
दनपरःसर्वधर्मोपदेशकः॥७१॥ परहंस
क्रियागोप्रायोगचर्याप्रदर्शकः॥ चतुर्थाश्र
मनिर्णेतासदानंदशरीरवान्॥७२॥ प्रदर्श
नान्यधर्मश्चभरतस्वाम्यपारकृत्॥ यथाव
त्कर्मकर्त्राचसंगानिष्टप्रदर्शकः॥७३॥आ

॥१३॥ वश्यकपुनर्जन्म कर्ममार्गप्रदर्शकः ॥ य
ज्ञरूपमृगशांतसहिष्णुः सत्पराक्रमः ॥७४॥
रहुगणगतिज्ञश्च रहुगणविमोचकः ॥ भ
वाटवितत्ववक्ताबर्हिमुखहितेरतः ॥७५॥
यज्ञस्वामीस्थानवंशकर्त्तास्थानविभेदकृत् ॥ ॥१३॥

पुरुषावयवो भूमिविशेशविनिरूपकः ॥७६
॥ जंबूद्विपपतिर्मेरुनाभिपद्मरुहाश्रयः ॥ ना
नाविभूतिर्लीलाढ्यो गंगोत्पत्तिनिदानकृत् ॥
७७ ॥ गंगामहात्म्यहेतुश्च गंगारूपो निगूढ
कृत् ॥ वैकुंठदेहहेत्वंबुजन्मकृत् सर्वपाव
नः ॥७८॥ शिवस्वामी शिवोपास्यो गूढसं

कर्षणात्मकः॥ स्थानक्षार्यमन्यादिरूपस
वैकपूजितः॥७९॥उपास्यनानारूपात्मा
ज्योतिरूपोगतिप्रदः॥ सूर्यनारायणोवेद
कांतिरूज्वलवेषधृक्॥ ८०॥ हंसोनरिक्ष
गमनः सर्वप्रसवकारणं॥ आनंदकर्त्ता

वसुधोबुधोवाक्यतिरुज्वलः॥८१॥कालो
त्माकालकालश्चकालछेदीकृदुत्तमः॥शि
शुमारः सर्वमूर्त्तिःराधिदैविकरूपधृक्॥
८२॥ अनंतसुखभोगाढ्योविवैरैश्वर्यभा
जनं॥ संकर्षणोदैत्यपतिः सर्वार्धरोबृहद्ध
पुः॥८३॥ अनंतनरकछेदीस्मृतिमात्रार्त्ति

नाशनः ॥ इतिश्रीभागवतपंचमस्कंधभा
॥१५॥ षानि ॥५॥ ॥सर्वानुग्रहकर्त्रेचमर्यादा
भिन्नशास्त्रकृत् ॥ ८४॥ कालांतकभयच्छेदी
नामसामर्थ्यरूपधृक् ॥ ऊह्यानर्हगोमात्मा
नामादिप्रेरकोत्तमः ॥ ८५॥ अजामिलमहा ॥१५॥
दुष्टमोचकोद्दविमोचकः ॥ धर्मवक्त्रादि

एवक्ताविष्णुभक्तस्वरूपदः ॥ ८६॥ सन्मा
र्गप्रेरको धर्म्मत्यागहेतुरधोक्षजः ॥ वैकुंठ
पुरनेताचसदासंवृद्धिकारकः ॥ ८७॥ दक्ष
प्रसादकृद्धंसगुह्यस्तुतिविभावनः ॥ स्वाभि
मायमयक्ताचसुकिजीवप्रसूतिकृत् ॥ ८८॥
नारदप्रेरितात्माचकर्षध्वब्रह्मभावनः ॥ सु

बलीश्वहितोगूढवाक्यार्थज्ञापनक्षमः ॥९९
॥१६॥ ॥ गुढार्थज्ञापनः सर्वमोक्षानंद प्रतिष्ठितः॥
पुष्टिप्ररोहहेतुश्च दासैकज्ञानहेतुतः ॥९०
॥ शांतकर्त्ता सुहितकृत् स्त्रीप्रसूः सर्वकाम
धृक्॥ पुष्टिवंशप्रणेताच विश्वरूपेष्टदेव ॥१६॥
ता ॥९१॥ कवत्वात्मा पालनात्माच वर्मोप

चितकारणं ॥ विश्वरूपशिरःछेदी त्वाष्ट्रयज्ञ
विनाशकः ॥९२॥ वृत्रस्वामी वृत्रगम्यो व्रत्र
व्रतपरायणः ॥ वृत्रकीर्त्ति वृत्रमोक्षो मघवत्प्रा
णरक्षकः ॥९३॥ अश्वमेधहविर्भोक्ता देवेंद्रा
मीवनाशकः ॥ संसारमोचकश्चित्रकेतुबोध
नतत्परः ॥९४॥ मंत्रसिद्धिः सिद्धिहेतुः सुसि

द्धिः फलदायकः॥ महादेवतिरस्कर्ता भक्त्यैपू
र्वार्थनाशकः॥ ९५॥ देवब्राह्मणविद्वेषवैमुख्य
ज्ञापकक्षमः॥ आदित्योदैत्यराजश्च महुमति
रचित्यकृत्॥ ९६॥ मरुतांभेदकस्त्राता व्रता
त्मापुंप्रसूतिकृत्॥ ॥इतिश्रीभागवतषष्ठस्कं
धनामानि॥ ६॥ ॥ कर्मात्मा वासनात्मा च कुं

तीलीलापरायणः॥९७॥ समस्तदैत्यसुरःस्वा
त्मा वैशम्यज्ञानसंश्रयः॥ देहाद्युपाधिरहितः
सर्वज्ञः सर्वहेतुवित्॥९८॥ ब्रह्मवाक्स्थाप
नपरः स्वजन्मावधिकार्यकृत्॥ सहसद्वास
नाहेतुस्त्रिसत्योभक्तमोचकः॥९९॥ हिरण्य
कशिपुद्वेषी प्रतिष्ठात्मा निभीषणः॥ शांतिज्ञा

नादिहेतुश्च प्रह्लादोप्तनिकारणः॥ १००॥ दैत्यसि
द्धांतवक्ता च तपः सार उदारधीः॥ दैत्यहेतुः प्र
कटनो भक्तिचिह्नप्रकाशकः॥ १०१॥ सद्वेषहे
तुसद्वेशवासनात्मा निरंतरः॥ नैष्ठुर्यसीमान्
प्रह्लादवत्सलः संगदोषहा॥ १०२॥ महानुभा
वः साकारः सर्वाकारः प्रमाणभूः॥ स्तंभप्रसू

तिर्नृहरिर्नृसिंहो भीमविक्रमः॥ ३॥ विकटा
स्योलजिह्वो नखशस्त्रो जयोत्कटः॥ हिरण्य
कशिपुश्छेदी क्रूरदैत्यनिवारकः॥ ४॥ सिंहा
सनस्थक्रोधात्मा लक्ष्मीभयविवर्द्धनः॥ ब्रह्मा
द्यंतभयभूरपूर्वाचिंत्यरूपधृक्॥ ५॥ भक्तैक

शांतहृदयो भक्तस्तुत्यः स्तुतिप्रियः ॥ भक्तांग
लेहनोद्धूतक्रोधपुंजप्रशांतधीः ॥ ६ ॥ स्मृति
मात्राभयत्राता ब्रह्मबुद्धिप्रदायकः ॥ गोरूप
धार्यमृतः पाशिवकीर्त्तिविवर्द्धनः ॥ ७ ॥ धर्मा
त्मा सर्वकर्मात्मा विशेशात्माश्रमप्रभुः ॥ संसा
रमग्नस्वोधर्त्ता सन्मार्गखिलतत्त्ववाक् ॥ ८ ॥

॥ इतिश्रीभागवतसप्तमस्कंधनामानि ॥ ७ ॥
आचारात्मा सदाचारो मन्वंतरविभावनः ॥ स्मृ
त्याशेशाशुभहरो गजेंद्रस्मृतिकारणं ॥ ९ ॥ जा
तिस्मरणहेत्वैकपूजाभक्तिस्वरूपदः ॥ यज्ञो
भयान्मनुत्राता विभुर्ब्रह्मव्रताश्रयः ॥ १० ॥ सत्य
सेनो दुष्टत्वानी हरिर्गजविमोचकः ॥ वैकुंठो लो

ककर्ता च अजितो लोककारणं ॥ ११ ॥ ऊरुक्र
मो भूमिहर्ता सर्वभौमो बलिप्रियः ॥ नितुः सर्वे
हितैकात्मा विश्वक्सेनः शिवः प्रियः ॥ १२ ॥ ध
र्मसेतुर्लोकधृतिसुधामांतरपालकः ॥ उपह
र्ता योगपतिर्बृहद्भानुः क्रियापतिः ॥ १३ ॥ चतु
र्दशप्रमाणात्मा धर्मो मन्वादिबोधकः ॥ लक्ष्मी

भोगैकनिलयो देवमंत्रप्रदायकः ॥ १४ ॥ दैत्य
व्यामोहकः साक्षात् गरुडस्कंधसंश्रयः ॥ लीला
मंदरधारी च दैत्यवासुकिपूजितः ॥ १५ ॥ समु
द्रोन्मथनायत्तोघ्नकर्तास्ववाक्यकृत् ॥ आदि
कूर्मः पवित्रात्मा मंदराघर्षणोत्सुकः ॥ १६ ॥
श्वासैजदब्धिवावीचिः कल्पांतावधिकार्यकृ

न् ॥ चतुर्दश महारत्नो लक्ष्मीसौभाग्यवर्द्धनः ॥
१७ ॥ धन्वंतरिः सुधाहस्तो यज्ञभोक्तार्त्तिना
शनः ॥ आयुर्वेदप्रणेताच देवदैत्याखिलार्चि
तः ॥ १८ ॥ बुद्धिव्यामोहको देवकार्यसाधनत
प्तरः ॥ स्त्रीरूपो मायया वक्ता दैत्यांतःकरणप्रि
यः ॥ १९ ॥ पायिनामृतदेवांशो बुद्धिहेतुः स्मृति

प्रदः ॥ सुमालीमालिवधकृत्माल्यवस्त्राण
हारक ॥ २० ॥ कालनेमिशिरःछेदी दैत्यय
ज्ञविनाशकः ॥ इंद्रसामर्थ्यदाताच दैत्यशे
षस्थितिप्रियः ॥ २१ ॥ शिवव्यामोहको मायी
भृगुमंत्रस्वशक्तिदः ॥ बलिजीवनकर्त्ताच
स्वर्गहेतुव्रतार्चितः ॥ २२ ॥ आदित्यानंद

॥२२॥ कर्त्रीचकश्यपादितिसंभवः॥ उपेंद्र इंद्राव
रजो यामनोब्रह्मरूपधृक्॥२३॥ ब्रह्मादिसे
वितवपुर्यज्ञपावनतत्परः॥ यांच्योपदेश
कर्त्रीचज्ञापितात्रोषसंस्तुतः॥२४॥ स
त्यार्थप्रेरकोसर्वदर्त्तागर्वविनाशकः॥ त्रि ॥२२॥
विक्रमस्त्रिलोकात्माविश्वमूर्त्तिः पृथुश्रवः॥

॥२५॥ पाशबद्धबलिः सर्वदैत्यपक्षोप
दर्शकः॥ सुतलस्थापितबलिः स्वर्गधि
कसुखप्रदः॥२६॥ कर्मसंपूर्त्तिकर्त्रीचस्व
र्गसंस्थापितामरः॥ ज्ञानात्त्रिविधधर्मात्मात्म
कामीनोब्धिसंश्रयः॥२७॥ सत्यव्रतप्रियोगो
ग्रामत्स्यमूर्त्तिधृतिश्रुतिः॥ शृंगबद्धधन

सोणि सर्वार्थज्ञापको गुरुः॥ २८॥ ॥इति
श्रीभागवतअष्टमस्कंधनामानि॥ ८ ॥
ईशसेवकलीलात्मा सूर्यवंशप्रवर्त्तकः॥सा
मवंशोद्भवकरोमनुपुत्रगतिप्रदः॥ २९॥
अंबरीषप्रियः साधुदुर्वासागर्वनाशकः॥ ॥२३॥
ब्रह्मशापोपसंहर्त्ताभक्तकीर्त्तिविवर्द्धनः॥

॥३०॥ इक्ष्वाकुवंशजनकः सगराद्यभि
ज्ञार्यदः॥ भगीरथमुखारत्नोगंगाधौतांघ्रि
पंकजः॥३१॥ ब्रह्मस्वामिन्निवस्वामीराग
रामजविघुक्तिदः॥ खड्गांगमोक्षकेतुश्चरघु
वंशाविवर्द्धनः॥३२॥ रघुनाथोरामचंद्रोराम
भद्रोरघुप्रियः॥ अनंतकीर्त्तिगुणात्मापुण्य

श्लोकैकभास्करः॥ ३३॥ कौशलेंद्रप्रमाणा
त्मासेव्योदशरथात्मजः॥ लक्ष्मणोभरतश्चै
वशत्रुघ्नोव्यूढविग्रहः॥ ३४॥ विश्वामित्र
प्रियोदांतस्ताडकावधनोश्रमः॥ यागयज्ञा
धिनिक्षिप्यमारीचश्चसुबाहुहा॥ ३५॥ वृष
ध्वजधनुर्भंगप्राप्तसीतामहोत्सवः॥ सीताप

तिर्भृगुपतिः गर्वपर्वतनाशकः॥ ३६॥ अयो
ध्यास्थमहाभोगयुक्तलक्ष्मीविनोदवान्॥ कै
केयीवाक्यकर्त्ताचपितृवाक्यरिपालकः॥ ३७
॥ वैराग्यबोधकोनन्यसात्विकस्थानबोधकः
अक्षिप्तदुःखकारिचगुहस्वामीसलक्ष्मणः॥
३८॥ चित्रकूटप्रियस्थानोदंडकारण्यपावनः

॥२५॥ शरभंगसुनीक्ष्णादिपूजितोगस्त्यभाग्यभूः॥
३९॥ ऋषिसंप्रार्थितक्षतिविराधवधपंडितः
॥ छिन्नसूर्यनखानासखरदूषणघातकः॥
४०॥ एकबाणहतानेकसकुलबलराक्षसः
॥ मारीचघातीनियतःसीतासंबंधशोभनः॥ ॥२५॥
४१॥ सीतावियोगनाद्युग्रजटायुवधमोक्षदः

मोक्षनः॥ ५३॥ भक्तिमार्गप्रतिष्ठानाविद्
न्मोक्षप्रवर्त्तकः॥ मूलकालगुणदृष्टानयना
नंदभाजनं॥ ५४॥ वसुदेवसुखाब्धिश्च
वकीनयनामृतं॥ पितृमातृस्तुतःपूर्वसर्व
वृत्तांतबोधकः॥ ५५॥ गोकुलागतिलीला
ख्यवसुदेयकरस्थितिः॥ सर्वसत्वप्रकटनो

योध्यापतिरत्यंतसर्वलोकसुखावहः॥४५॥
मथुरांपुरनिर्मातासुकृतज्ञस्वरूपदः॥जन
कज्ञानगम्यएकांतमकटक्रनिः॥४६॥कैट
यांतकरोरामोदुष्टक्षत्रविनाशकः॥सोमवं
शकिर्तैकात्मायदुवंशविवर्द्धनः॥४७॥इति
श्रीभागवतनवमस्कंधनामानि॥ ॥९॥ ॥

परब्रह्मावतरणःकेशवःक्लेशनाशनः॥
भूमिभारावतरणोभक्तार्थाखिलमानसः॥४८
सर्वभक्तनिरोधात्मालीलामनुष्यनिरोधकृत्॥
भूमिष्टपरमानंदोदेवकीसुखिकारणं॥४९॥
सर्वदेवज्ञाननिष्टसमजीवनिवारकः॥स
र्ववैराग्यकरणःस्वलीलाधारशोधकः॥

॥५०॥ मायाज्ञापनकर्त्ताचशेषसंभारसंभृ
॥२७॥ तिः॥ भक्तक्लेशपरिज्ञातानन्निवारणतत्परः
॥५१॥ आविष्टवसुदेवांशोदेवकीगर्भभूष
णं॥ पूर्णतेजोमयः पूर्णः कंसाधृश्यप्रताप
वान्॥५२॥ विवेकज्ञानदाताचब्रह्माद्यखि
लसंस्तुतः॥ सत्योजगत्कल्पतरुनानारूपवि

॥२७॥

शबरीपूजितोभक्तहनुमत्प्रमुखावृतः॥४२॥
दुंदुभ्यस्तप्रहरणः सप्ततालविभेदनः॥सुग्री
वराज्यदोवालिघातिसागरशोषणः॥४३॥
सेतुबंधनकर्त्ताचबिभीषणहितप्रदः॥रा
वणादिशिरश्छेदीराक्षसाद्यौघनाशकः॥४४
सीताभयप्रदाताचपुष्पकागमनोत्सुकः॥अ

॥२८॥ मायाव्यसनयकारकः॥ ज्ञानमोक्षिनदुष्टेशः
प्रपंचास्मृतिकारणं॥५६॥ यशोदानंदनोनं
दभाग्यभूगोकुलोत्सवः॥५७॥ नंदप्रियोनंद
सूनुर्यशोदास्तनंधयः॥ पूतनासुपयः
पानासुग्धभावानिसुंदरः॥५८॥ सुंदरीहृ ॥२८॥
दयानंदोगोपिमंत्राभिमंत्रितः॥ गोपाला

निर्भयुपनिः गर्वपर्वतनाशकः॥३६॥ अयो
ध्यास्थमहाभोगयुक्तलक्ष्मीविनोदवान्॥ कै
केयीवाक्यकर्त्रीचपितृवाक्यरिपालकः॥३७
॥ वैराग्यबोधकोनन्यसात्विकस्थानबोधकः
अक्षिव्याद्युःखहारिचगुहस्वामीसलक्ष्मणः॥
३८॥ चित्रकूटप्रियस्थानोदंडकारण्यपावनः

॥६२॥ गोपबालकभावज्ञो चौर्यविद्याविशारदः॥ मृ
त्स्नाभक्षणीलीलाचमाहात्म्यज्ञानदायकः॥ ६३॥ ध
राद्रोणप्रतीकर्त्तादधिभाडविभेदनः॥ दामोदरो भ
क्तवश्योयमलार्जुनभंजनः॥ ६४॥ वृहद्धनमहाश्च
र्यो वृंदावनगतिप्रियः॥ वत्सघातिबालकेलिबकासु

तिप्राप्तो गोविंदेंद्राभिधानवान्॥ व्रतादिधर्मसंस
क्तनंदक्लेशविनाशकः॥७९॥ नंदादीगोपमातृष्ट
वैकुंठगतिदायकः॥ वेणुवादस्वरक्षोभमत्तगोपि
विमुक्तिदः॥८०॥ सर्वभावप्राप्तगोपीसुखसंवर्द्ध
नक्षमः॥ गोपीगर्वप्रणाशार्थनिरोधानसुखप्रदः
॥८१॥ कृष्णभावव्याप्तविश्वगोपीभावितदोषधृ

॥३०॥ गुल्मवृक्षरूपनिरूपकः॥ नादब्रह्मप्रकटनोव
यःप्रतिगतिःस्वनः॥६९॥ बर्हिन्यानुकरणोगोपा
लानुकृतिस्वनः॥ सदाचारप्रतिष्ठाबलाश्रमनिरा
कृतिः॥७०॥ तरुमूलकृताशेषतल्पशायीसखि ॥३०॥
स्तुतः॥ गोपालसेवितपदश्रीलालितपदांबुजः॥७१
गोपसंप्रार्थितफलदाननाशितधेनुकः॥ कालीय

७२
फणमाणिक्यरंजितश्रीपदांबुजः॥ दृष्टिसंजीविता
शेषगोगोपगोपिकाप्रियः॥ लीलासंपीतदावाग्निः
प्रलंबबधपंडितः॥७३॥ दावाग्न्यावृतगोपालद
ष्ट्याछादवह्निपः॥ वर्षाशरद्विभूतिश्रीर्गोपीकाम
प्रबोधकः॥७४॥ गोपिरत्नस्तुताशेषवेणुवाद्यवि
शारदः॥ कात्यायनीव्रतव्याजसर्वभावाश्रितांग

॥३१॥ तः॥७५॥ सत्संगतिस्तुतीव्याजस्तुतवृंदावनप्रियः
गोपक्षुच्छांतिसंख्याजविप्रभार्याप्रसादकृत्॥७६॥
हेतुप्राप्तेंद्रयागस्वकार्यगोसर्वबोधकः॥ शैलरूप
कृताशेषरसभोगसुखावहा॥७७॥ लीलागोवर्द्ध
नोद्धारपालितस्वव्रजप्रियः॥ गोपस्वछंदलीला ॥३१॥
र्थगर्गवाक्यार्थबोधकः॥७८॥ इंद्रधेनुस्तुतिप्राप्त

रनिषूदनः॥६५॥ अरण्यभोक्ताप्यथवाबाललीला
परायणः॥ प्रोत्साहजनकश्चैवमघासुरनिषूदनः
॥६६॥ व्यालमोक्षप्रदःपुष्टोब्रह्ममोहप्रवर्द्धनः॥अ
नंतमूर्त्तिसर्वात्माजंगमस्थावराकृतिः॥६७॥ब्रह्म
मोहनकर्त्ताचस्तुत्यआत्मासदाप्रियः॥ पौगंडली
लाभिरतिर्गोचारणपरायणः॥६८॥ वृंदावनलता

कृ॥ राधाविशेषसंभोगप्राप्तदोषनिवारकः॥८२॥
॥३२॥ परमप्रीतिसंगीतसर्वाद्भुतमहागुणः॥ मानापमो
दनाक्रंदगोपिदृष्टिमहोत्सवः॥८३॥ गोपिकाव्या
प्तसर्वांगस्त्रीसंभाषाविशारदः॥ रासोत्सवमहासौ
ख्यगोपिसंभोगसागरः॥८४॥ जलस्थलरतिव्याप्त ॥३२॥
गोपिदृष्ट्याभिपूजितः॥ शास्त्रानपेक्षकामैकमु

श्चर्यरसकृत्शकटासुरखंडनः॥५९॥ नंदव्रजज
नानंदीनंदभाग्यमहोदय॥ तृणावर्तवधोत्साहो य
शोदाज्ञानविग्रह॥६०॥ बलभद्रप्रियः कृष्णः संक
र्षणसहायवान्॥ रामानुजो वासुदेवो गोष्ठांगणप
तिप्रियः॥६१॥ किंकिणीस्वभावज्ञो वत्सपुच्छाव
लंबनः॥ नवनीतप्रियो गोपीमोहसंसारनाशकः॥

॥३३॥ हृदसंदर्शिताशेषवैकुंठाक्रूरसंस्तुतः॥ ८९॥ मथुरांगम
नोत्साहो मथुरांभाग्यभाजनं॥ मथुरांनगरीशोभादर्शनो
त्सुकमानसः॥ ९०॥ दुष्टरंजकघातीचवायकार्चितवि
ग्रहः॥ वस्त्रमालासुशोभांगः कुब्जालेपनभूषितः॥ ९१॥
कुब्जासुरूपकर्त्ताचकुब्जारतिवरप्रदः॥ प्रसादरूपसं ॥३३॥
तुष्टहरकोदंडखंडनः॥ ९२॥ शकलाहतकंसाप्तधनुर

दनः॥ २०७॥ भद्रावांछितभर्त्ताचलक्ष्मणावरणक्षमः
॥ इंद्रादिप्रार्थितवधनरकासुरसूदन॥ २०८॥ मुरा
रीपिठहंताचताम्रादिप्राणहारकः॥ षोडशस्त्रीस
हस्रेशः छत्रकुंडलदानकृत्॥ २०९॥ पारिजातापह
रणोदेवेंद्रमदनाशकः॥ रुक्मिणीसमसर्वस्त्रीसाध्य
भोगरतिप्रदः॥ २१०॥ रुक्मिणीपरिहासोक्तिवाक्

नंदादीनांत्वनकरोब्रह्मचर्यव्रतेस्थितः॥ गुरुशुश्रुषण
परोविद्यापारमितेश्वरः॥९७॥ सांदीपिनमृतापत्यदाता
कालांतकादिजित्॥ गोकुलाश्वासनपरोयशोदानंदपो
षकः॥९८॥ गोपिकाविरहव्याजमनोगतिरतिप्रदः॥
समोद्धवभ्रमरवाक्गोपिकामोहनाशकः॥९९॥ कुब्जा
रतिप्रदोक्रूरपवित्रीकृतभूग्रहः॥ पृथादुःखप्रणेताच

पांडवानांसुखप्रदः॥२००॥ जरासंधसमानीतसैन्य
धातिविचारकः॥ यवनव्याप्तमथुराजनदत्तकुशस्थ
लः॥२०१॥ द्वारकाद्भुतनिर्माणविस्मापितसुरासुरः॥
मनुष्यमात्रभोगार्थभूम्यानित्येंद्रवैभवः॥२०२॥ यवन
व्याप्तमथुरानिर्गमानंदविग्रहः॥ मुचुकंदमहाबोधप
वनप्राणघातकः॥२०३॥ मुचुकंदस्तुताशेषगुणक

र्ममहोदयः॥ फलप्रदानसंतुष्टजन्मांतरीतमोक्षदः॥
॥२०४॥ शिवब्रह्मणवाक्याप्तजयभीतिविभावनः॥
प्रवर्षणप्रार्थिताग्निदानपुण्यमहोत्सवः॥२०५॥ रुक्मि
णीरमणः कामपिताप्रद्युम्नभावनः॥ स्यमंतकमणिव्या
जप्राप्तजांबुवतीसुतिः॥ २०६॥ सत्यभामाप्राणपतिः का
लिंदीरतिवर्द्धनः॥ मित्रविंदापतिसत्यापतिवृषनिषू

क्षकसैन्यकः॥ जाग्रत्स्वप्नभयव्याप्तमृत्युलक्षणबो
धकः॥ ९३॥ मथुरांमल्लऊर्जस्वीमल्लयुद्धविशारदः
॥ सद्यःकुवलयापीडघातीचाणुरमर्द्दनः॥ ९४॥ लीलाह
तमहामल्लसलतोसलघातकः॥ कंसांतकोजितामित्रोव
सुदेवविमोचकः॥ ९५॥ ज्ञानतत्वपितृज्ञानमोहनामृतवा
ङ्मयः॥ उग्रसेनप्रतिष्ठातायादवाधिविनाशकः॥ ९६॥

निरोधानकारकः॥ पुत्रपौत्रमहाभाग्यप्रदधर्मप्र
दर्शकः॥२११॥शंबरांतकसत्पुत्रविवाहकृतरक्मिकः
॥उषापहृतपौत्रश्रीबाणबाहुनिवारकः॥२१२॥त्री
तज्वरभयव्याप्तज्वरसंस्तुतषड्गुणः॥शंकरप्रतियो
द्धाचद्वंद्वयुद्धविशारदः॥२१३॥नृगपापप्रणेताचब्र
ह्मस्वगुणदोषधृक्॥विष्णुभक्तिविरोधैकब्रह्मस्थवि

क्तिद्वारविवर्द्धनः॥८५॥सुदर्शनमहासर्पग्रस्तनंदविमो
चकः॥गीतमोक्तिगोपीधृक्शंखचूडविनाशकः॥८६॥
गुणसंगीतसंतुष्टोपिसंसारविस्मृतिः॥अरिष्टमथनोद्यु
क्तबुद्धिद्यामोदकारकः॥८७॥केशीघातिनारदेष्टोद्यो
मासुरविनाशकः॥अक्रूरभक्तिसंराधपादरेणुमहानि
धिः॥८८॥ स्थावरोद्धृद्धात्मागोपिमानसहारकः॥

॥२१७॥ लांगलाकृष्टनगरीसंविग्नाखिलनागरः
॥३७॥ ॥प्रपन्नोभयदःसांबःप्राप्तसन्मानभाजनं॥२१८
नारदान्विष्टचरणोभक्तविक्षेपनाशकः॥सदा
चारैकनिलयःसुधर्माध्यासितासनः॥२१९॥ज
रासंधाविरुद्धेनविज्ञापितनिजक्लमः॥ मंत्र्युद्ध ॥३७॥
वादिवाक्योक्तप्रकारैकपरायणः॥२२०॥ राजसू

रोधानकर्ताव्यग्रस्त्रीचित्तभावनः॥ ॥इतिश्री
भागवतदशमस्कंधनामानि॥ १०॥ ॥मुक्ति
लीलाविहरणोमौसलव्याजसंहृतिः॥ ३५॥ श्री
भागवतधर्मादिबोधकोधर्मनीतिकृत्॥ उद्धव
ज्ञानदाताच पंचविंशतिधागुरुः॥३६॥ आचा
रमुक्तिभक्त्यादिवक्ताशब्दोद्भवस्थितिः॥ हंसोध

कः॥ दंतवक्त्रवधव्याजविजयाघौघनाशकः
॥२४॥ विदूरथप्राणहर्त्तान्यस्तशास्त्रास्त्रविग्र
हः॥ उपधर्मविलिप्तांगसूतघातीवरप्रदः॥२५॥
बल्वलप्राणहरणपालितर्षिश्रुतिक्रीयः॥ सर्व
तीर्थाघनाशार्थतीर्थयात्राविशारदः॥२६॥ ज्ञान
क्रियाविभेदेष्टफलसाधनतत्परः॥ सारथ्यादिक्रि

याकर्त्ताभक्तवश्यात्वबोधकः॥२७॥ सुदामारंक
भार्यार्थभूम्यानीतेद्रवैभवः॥ रविग्रहनिमित्ता
प्तकुरुक्षेत्रैकपावनं॥२८॥ नृपगोपीसमस्तस्त्री
पावनार्थाखिलक्रियः॥ ऋषिमार्गप्रतिष्ठाताव
सुदेवमखक्रियः॥२९॥ वसुदेवज्ञानदानादेवकी
पुत्रदायकः॥ अर्जुनस्त्रीप्रदाताचबहुलाश्वस्वरू

पदः ॥ ३० ॥ अतदेवेष्टदानाचसर्वत्रनिरूपि
नः ॥ महादेवाद्यतिश्रेष्ठभक्तिलक्षणनिर्णयः ॥
॥ ३१ ॥ वृकयज्ञशिवत्राणानानावाक्यविशारदः ॥
नरगर्वविनाशार्यहृतब्राह्मणबालकः ॥ ३२ ॥ लो
कालोकपरस्थानस्तिनिबालकदायकः ॥ द्वार ॥३९॥
कास्थमहाभोगनानास्त्रीरतिवर्द्धनः ॥ ३३ ॥ मन

यादिमखकृत्संप्रार्थिनसहायकृत् ॥ इंद्रप्रस्थप्रया
णार्थमरुत्संभारसंभृतिः ॥ ३४ ॥ राजसंधवधव्याज
मोचितासेषभूमिपः ॥ सन्मार्गबोधकोयज्ञक्षिति
पारणतत्परः ॥ ३५ ॥ शिशुपालकृतिव्याजजयश्री
पविमोचक ॥ दुर्योधनाभिमानाब्धिशोषबाणवृ
कोदरः ॥ ३६ ॥ महादेववरप्राप्तपुरणाल्पविनाश

र्यप्रवक्ताचसनकाद्युपदेशकृत्॥३७॥ भक्ति
साधकवक्ताचयोगसिद्धिप्रदायकः॥ नानाविभू
तिवक्ताचशुद्धकर्मावबोधकः॥३८॥ मार्गत्र
यविभेदात्मा नानाशंकानिवारकः॥ भिक्षुगी
ताप्रवक्ताचशुद्धसांख्यप्रवर्त्तकः॥३९॥मनो
गुणविभेदात्मा ज्ञापकोक्तपुरुषाः॥ पूजावि

निवारकः॥२१४॥ बलभद्रकृतगुणोगोकुलोपि
निरायकः॥ गोपिस्नेहैकनिलयोगोपिप्राणस्थि
तिप्रदः॥२१५॥ याक्यानिगमिषमुनाकृष्णाकर्षण
वैभवः॥ पौंड्रकात्याजितस्पर्द्धःकाशिराजविभेद
नः॥२१६॥ काशीनिदाहकरकनिवभस्मप्रदाय
कः॥ द्विविदप्राणघातीचकौरवगर्वनुत्॥

॥ ४१ ॥

ज्ञाताकल्किकलिमलापहा ॥ ४३ ॥ शास्त्रवैराग्य
संबोधोनानाप्रलयबोधकः ॥ विशेषनशुकव्याज
परीक्षद्ज्ञानबोधकः ॥ ४४ ॥ शुकेष्टानिनिरूपात्मा
परिक्षद्देहमोक्षदः ॥ शब्दरूपिनादरूपोवेदरूपो
विभेदनः ॥ ४५ ॥ व्यासशाखाप्रवक्ताचपुराणार्थ
प्रवर्त्तकः ॥ मार्कंडेयप्रसंन्नात्मावटपत्रपुटेशयः

॥ ४१ ॥

॥ सुरतवर्त्तमानदरपणप्रेसमां विज
भूखणदासकीरपारामे छाप्युं॰ साके १७८२
ना प्रथम आश्विनशुद्ध १ वार रवौ ॥

पुराणांतरभाषितं॥ ४९॥ य एतत्प्रातरुत्थाय श्र
द्धावान्सुसमाहितः॥ जपेदर्थाहितमतिः सगोविं
दपदं व्रजेत्॥ ५०॥ सर्वधर्मविनिर्मुक्तः सर्वसाध
नवर्जितः॥ एतद्धारणमात्रेण कृष्णस्य पदवीं व्र
जेत्॥ ५१॥ हर्यावेशितचित्तेन श्रीभागवतसागरा
त्॥ समुद्धृतानि नामानि चिंतामणिविभावनः॥

५२॥ कंठस्थितान्यर्थदीप्त्यार्बंधते ज्ञानजं तमः॥
भक्तिं श्रीकृष्णदेवस्य साधयंति विनिश्चितं॥ ५३
॥ किं बहूक्तेन भगवान्नामभिस्तुतषड्गुणः॥
आत्मभावं नयत्याशु भक्तिं च कुरुते दृढा॥ ५४॥
यः कृष्णभक्तिमिह वांछंति सांधनोघैर्नामानि भा
सुरयशांसि जपंत्सुनित्यं॥ तं वै हरिः स्वपुरुषं कु

रुतेतिशीघ्रमात्मार्पणंसमधिगच्छतिभावतुष्ट
॥५५॥ श्रीकृष्णकृष्णसखवृष्णिवृषावनीध्रु
क्राजन्यवंशदहनानपवर्गवीर्यः॥ गोविंदगोप
वनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल
पाहिभृत्यान् ॥२५६॥ ॥इतिश्रीभागवतसा
रसमुच्चयेवैश्वानरोक्तंनाम्नांसहस्रंसंपूर्णं॥

॥४६॥ मायाव्याप्तमहामोहदुःखशांतिप्रवर्त्तनः
॥ महादेवस्वरूपश्चभक्तिदाताकृपानिधिः॥४७॥
आदित्यांतर्गतःकालोद्वादशात्मासुपूजितः॥श्री
भागवतरूपश्चसर्वार्थफलदायकः॥ ४८॥ इ
तिश्रीभागवतद्वादशस्कंधनामानि॥ इतिदंकीर्त्त
नीयस्यहरेर्नामसहस्रकं॥ पंचसप्ततिविस्तीर्णं

पुरुषोत्तम सङ्कल्पनाम ॥